# श्रीसुरसरस्वतीसभा शृङ्गेरि

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – 31-08-2025 अङ्काः – 50

अपराह्ने – 1:30 तः 3:00 पर्यन्तम् समयः – सार्धैकहोरा

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** 5

१. विद्यार्थि-जीवनम् २. संस्कृताध्ययनस्य महत्त्वम् ३. श्रीकृष्णः

2 (अ) लृङ्-लकारः कदा प्रयुज्यते? सोदाहरणं विशदयत । 4

(आ) पञ्चमीविभक्तिः कदा भवति? सोदाहरणं विवृणुत । 4

3 (अ) उत्प्रेक्षा-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) “वातालयाधिप नमोऽस्तु निरुन्धि रोगान्”- अत्र किं वृत्तमिति सलक्षणं सप्रस्तारं च विवृणुत । 4

**4 उत्तरं लिखत । (त्रयाणामेव)** 3

१. भूतकालं द्योतयितुं के के लकाराः उपयुज्यन्ते?

२. द्वौ द्विकर्मकधातू लिखति ।

३. अतिशयोक्ति-अलङ्कारस्य लक्षणं किम्?

४. उपेन्द्रवज्रा-वृत्तस्य लक्षणं किम्?

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. चकार २. अवर्धिष्ट ३. लप्सीष्ट ४. दाता

**6 प्रयोगपरिवर्तनं कुरुत ।** 4

१. मृगैः त्रस्येत । २. अस्माभिः पापात् भेतव्यम् ।

३. वयम् उपविशामः । ४. सायङ्काले बालकैः क्रीड्यते ।

**7 वाक्यदोषं परिहरत ।** **4**

१. भीमः अद्य रात्रौ भोजनं खादिता ।

२. सः अक्ष्णोः काणः ।

३. रावणात् अभिक्रुध्यति ।

४. ग्रन्थं लेखनम् ।

**8 टिप्पणीं लिखत । (एकस्य)** **2**

१. सति-सप्तमी

२. अल्पविराम-अर्धविरामौ

**9 मातृभाषया अनुवदत ।** **5**

१. कस्य हेतोः पुनरसौ चन्द्रगुप्ताय कुप्यति चाणक्यः?

२. वायसः पक्षिणां धूर्तः ।

३. इमे संस्कृतस्य प्राशस्त्यम् अधिकृत्य भणितारः ।

४. बहु जगद पुरस्तात् तस्य मत्ता किलाहम् ।

५. ननु च विदुषां सन्निधावस्माभिस्तूष्णीकैरेव भूयते ।

**10 संस्कृतभाषया परिवर्तयत ।** **5**

१. ಅವನು ಕದ್ದನು, ಆದ್ದರಿಂದ ಪೋಲೀಸರಿಂದ ಹಿಡಿಯಲ್ಪಟ್ಟನು.
He stole, so he was caught by the police.

२. ತಂದೆ ನೋಡಿದ್ದರೆ ವಿಷಣ್ಣನಾಗುತ್ತಿದ್ದನು.
If father had seen, he would have become sad.

३. ಅವರಿಬ್ಬರು ಹೋದಮೇಲೆ ಹೇಳುವೆನು.
I shall tell you after both of them go away.

४. ನೀವಿಬ್ಬರೂ ವಿದ್ಯೆಯನ್ನು ಪಡೆಯಿರಿ.
May both of you attain knowledge.

५. ನನ್ನಿಂದ ಅವಳು ಯಾವಾಗ ನೋಡಲ್ಪಟ್ಟಳೋ ಆಗ, ಅವಳಿಂದ ನಾಚಿಕೆಗೊಳ್ಳೋಣವಾಯಿತು.
When she was seen by me, it was felt shy of, by her.

--------------------------